ISSN 2454-8596
www.vidhyayanaejournal.org
VIDHYAYANA An International Multidisciplinary Research e-Journal

# रघुवंश–कुमारसम्भव–महाकाव्यस्थ–वसन्त–ऋतोस्तुलनात्मकमध्ययनम् ।।

**Kaushik A Rajyaguru**

ISSN 2454-8596
www.vidhyayanaejournal.org
VIDHYAYANA
An International Multidisciplinary Research e-Journal

**शिशिरः पुष्पसमयो ग्रीष्मो वर्षाशरद्धिमाः ।**
**माघादिमासयुग्मैः स्युर्ऋतवः षट् क्रमादमी ।।**

ऋ ´ अर्तेश्च तुः ।। १/७२ इत्युणादिसूत्रेण तुः, चकारात् किच्च, तेना नादिगुण– वृद्धिविधिः । ऋतुः कालविशेषः ।। सः तु षड्विधः यथा मार्गपौषौ हिमः, माघफाल्गुनौ शिशिरः, चैत्रवैशाखौ वसन्तः, ज्येष्ठाषाढौ ग्रीष्मः, श्रवणभाद्रौ वर्षाः, आश्विनकार्त्तिकौ शरत्– इत्यमरः । दीप्तिरिति मेदिनी । मासः सुवीरो वेति विश्वः ।।

**वर्षाः शरच्च हेमन्तः शिशिरश्च वसन्तकः ।**
**ग्रीष्मश्चेति क्रमादेते ऋतवः षट् प्रकीर्तिताः ।।** इति हारितः ।।

संस्कृतवाङ्मये यत्र यत्र प्रसङ्गानुरूपम् ऋतोः वर्णनं समायाति तत्र तत्र कविकुलगुरोः कालिदासस्य स्मरणं भवत्येव । **ऋतूनां कुसुमाकरः** इति भगवद्गीताया भगवद्वचनं संस्मृत्य कविकुलगुरु–कालिदासविरचितमहाकाव्ययोः (रघुवंशमहाकाव्ये कुमारसम्भवमहाकाव्ये च) वसन्त–ऋतोर्यत्र वर्णनं प्राप्यते तन्निरूप्यते ।

➢ **रघुवंशमहाकाव्यस्थ–वसन्त–ऋतुवर्णनम् ।।**

**क इह रघुकारे न रमते ?** इति वचनेन रघुवंशस्य कालिदासस्य च महत्ता प्रतिपाद्यते । तत्र रघुवंशमहाकाव्ये क्वचित् क्वचित् कथावस्तुप्रवाहस्य स्थाने कविः स्वकल्पनाशक्तिम्– निर्बद्धतयावाहयत् । तेन वर्णने कल्पनायाः लीला चेतोहरतामवाप्नोति । रघुवंशस्य नवमे सर्गे कालिदासः प्रकृतिवर्णनपुरःसरं मनोहरेण यमकालङ्कारेण युक्ते सुदीर्घपटे वसन्तवर्णनमकारि । समुपागतस्य वसन्तकालस्यागमनसूचनावर्णनं प्राप्यते । यथा –

**अथ समाववृते कुसुमैर्नवै–**
**स्तमित सेवितुमेकनराधिपम् ।**
**यमकुबेरजलेश्वरवज्रिणां**
**समधुरं मधुरञ्चितविक्रमम् ।। रघुवंशम् ९/ २४ ।।**

धर्मराजधनदवरुणामरेन्द्राणां माध्यस्थवितरणसंनियमनैश्वर्यैस्तुल्यकक्षं पूजितपराक्रम– मेकनराधिपं दशरथं सेवितुमिव मधुर्वसन्तः । दैत्ये चैव वसन्ते च जीवाशोके मधुर्द्रुमे ।। इति विश्वः । कुसुमैरुपलक्षितः सन्समाववृते समागतः —रिक्तहस्तेन नोपेयाद्राजनं देवतां गुरु˘मिति वचनात्पुष्पसमेतो राजानं सेवितुमागतो वसन्त इत्यर्थः ।।

**जिगमिषुर्धनदाध्युषितां दिशं**
**रथयुजा परिवर्तितवाहनः ।**

**दिनमुखानि रविर्हिमनिग्रहै–**
**विमलयन्मलयं नगमत्यजत् ।। रघुवंशम् – ९/२५ ।।**

अस्मिन्नपि श्लोके कालिदासः वसनतवर्णनं प्रतिपादयति । यथा – कुबेराधिष्ठितां दिशं गन्तुमिच्छु रथयुजा सारथिनाऽरुणेन परिवर्तितवाहनो रविः हिमस्य निराकिरणैः प्रभातानि विषदयन् मलयाचलमत्यजन् । दक्षिणां दिशमत्याक्षीदित्यर्थः ।। अथ च

**कुसुमजन्म ततो नवपल्लवा–**
**स्तदनु षट्पदकोकिलकूजितम् ।**
**इति यथाक्रममाविरभून्मधु–**
**द्रुमवतीमवतीर्यवनस्थलीम् ।। रघुवंशम् ९/२६ ।।**

आदौ कुसुमजन्मस्ततो नवपल्लवाः, तदुभयानन्तरं षट्पदानां कोकिलानाञ्च कूजितम् । इत्येवं प्रकारेण क्रममनतिक्रम्य भृङ्गः पल्लवप्रियः कोकिल इति क्रमोक्तेरयमाशयः । द्रुमभूयिष्ठां वनस्थलीमवतीर्य वसन्त आविरभूत् ।

वसन्त–ऋतु–वर्णनं प्रतिपादकं पद्यमिदं मन्मतानुसारं सम्पूर्णसंस्कृतवाङ्मये वसन्त– ऋतुवर्णनस्योत्कृष्टतां प्रतिपादयति । याथातथ्यं वर्णनात्मकं पद्यम् । खलु तत्र विशेषरूपेणाचार्यो मल्लिनाथो लिखति स्म यत् ——– केषाञ्चिद् द्रुमाणां पल्लवप्राथम्यात् केषाञ्चित्कुसुमप्राथम्यात् नोक्तक्रमस्य दृष्टविरोधः ।~~

जगत्यस्मिन् बहवः द्रुमाः सन्ति, तत्र केषुचिद्द्रुमेषु पल्लवस्य प्राथम्य वर्तते, केषुचित् पुष्पस्य, तस्मादेव कालिदासोक्तवर्णने नोक्तक्रमस्य दृष्टविरोधः । न च कवित्वात् निरङ्कुशत्वम् ।

नवं प्रत्यग्रशोकतरोः केवलं कुसुममेव स्मरदीपनमुद्दीपनं न । किन्तु विलासिनां मदजनको दयिताश्रवणार्पितः किसलयप्रसवोऽपि स्मरदीपनोऽभवदिति कालिदासवर्णनम् ।

इतः परं बहूषु श्लोकेषु (रघुवंशम् – ९/२५–४६) वसन्त–ऋतोर्वणनं लभ्यते, किन्तु विस्तारभयात् नात्र विवेच्यते ।

- **कुमारसम्भवमहाकाव्ये वसन्त–ऋतुवर्णनम् ।**

रघुवंशमहाकाव्यस्य वसन्तवर्णनमिव कुमारसम्भवमहाकाव्येऽपि वसन्त–ऋतुवर्णन– मत्यन्तं समुचितं सुसन्दर्भं रमणीयताप्रतिपादयकञ्च वर्तते । शीत्र्वापि सर्वथा देवकार्यं साधयिष्यामीति कृतनिश्चयस्सन् इन्द्रप्रेरितः वसन्तसहायकः मदनः ध्यानस्थभगवतः शङ्करस्य योगभङ्गकरणाय हैमवतं स्थाण्वाश्रमं जगाम ।

**तस्मिन्वने संयमिनां मुनीनां**
**तपः समाधेः प्रतिकूलवर्ती ।**
**सङ्कल्पयोनेरभिमानभूत–**
**मात्मानमाधाय मधुर्जजृम्भे ।। कुमारसम्भवम् ३–२४ ।।**

तस्मिन् वने स्थाण्वाश्रमे संयमिनां समाधिमतां मुनीनां समाधेरेकाग्रतायाः प्रतिकूलं वर्तत इति प्रतिकूलवर्ती विरोधी वसन्तः सङ्कल्पयोनेर्मनोभवस्याभिमानभूतम् । गर्वहेतुभूत– मित्यर्थः । कार्यकारणयोरभेदोपचार आत्मानं निजस्वरूपमाधाय सन्निधाय जजृम्भे । वसन्त– धर्मान्प्रवर्तयामासेत्यर्थः ।।

**कुबेरगुप्तां दिशमुष्णरश्मी**
**गन्तुं प्रवृत्ते समयं विलङ्घ्य ।**
**दिग्दक्षिणा गन्धवहं मुखेन**
**व्यलीकनिश्वासीमवोत्ससर्ज ।। कुमारसम्भवम् ३/२५ ।।**

उष्णरश्मौ समयं विलङ्घ्य दक्षिणायनकालं सङ्क्रमकालञ्च विलङ्घ्याकाण्डे व्यतिक्रम्य धनपतिपालितां कुत्सितशरीरेण केनचिद्रक्षिताञ्च दिशमुदीचीं गन्तुं प्रवृत्ते सति दिक्मुखेन गन्धवहमनिलं व्यलीकेन दुःखेन वा व्यलीकनिश्वासमिव प्रवर्तयामास ।।

**असूत सद्यः कुसुमान्यशोकः स्कन्धात्प्रभृत्येव सपल्लवानि ।**
**पादेन नापैक्षत सुन्दरीणां सम्पर्कमासिञ्जितनूपुरेण ।।**
**कुमारसम्भवम् ३/२६ ।।**

तस्मिन्नशोको वृक्षविशेषो सद्यः स्कन्धात्प्रभृत्येव सपल्लवानि कुसुमान्यसूत । उभयमप्यमजीजनदित्यर्थः । तदनु वसन्त–ऋतुवर्णनस्य प्रख्याततमः श्लोकः कालिदासस्य

**मधुद्विरेफः कुसुमैकपात्रे पपौ पुनः स्वामनुवर्तमानः ।**
**शृङ्गेण च स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः ।।**
**कुमारसम्भवम् ३/३६ ।।**

ISSN 2454-8596
www.vidhyayanaejournal.org
VIDHYAYANA
An International Multidisciplinary Research e-Journal

द्वौ रेफौ वर्णविशेषौ यस्य स द्विरेफः भ्रमरः कुसुमैकपात्रे मधु स्वां प्रियामनुसरन् पपौ, तत्पीतमिति । कृष्णसारः (कृष्णमृगः) स्पर्शसुखेन मृगीं शृङ्गेणाकण्डूयत कर्षितवानित्यर्थः ।

इत्येवं प्रकारेणास्मिन् काव्येऽपि बहुषु श्लोकेषु प्राप्यते वसन्त-ऋतुवर्णनम् । किन्तु समासत्वात् न विवेच्यते ।

➢ **महाकाव्यद्वयस्थ-वसन्त-ऋतोस्तुलनात्मकमुपसंहारः ।**

महाकवि-कालिदास-विरचित-महाकाव्यद्वयं, तत्रापि विशेषतः ऋतुवर्णनकल्पनाया उत्कृष्टत्वात्, शब्दार्थालङ्काराणां समुचितप्रयोगात्, वर्णनेषु नातिक्लिष्टत्वात्, वर्णन- स्योचितत्वात्, सुसङ्गतत्वातच्च मनोहरति । किन्तु द्वयोः काव्ययोः वसन्तऋतुवर्णने कुत्रचित् साम्यं कुत्रचित् वैषम्यञ्च दरीदृश्यते । यथा – महाकाव्यद्वये प्राप्ते वसन्तऋतुवर्णनेऽशोक- वृक्षस्य, कामदेवस्य, भ्रमरस्य तथा च सूर्यस्य दक्षिणदिशः कुबेरदिशं प्रति गमनमित्यादिषु बहुषु वर्णनेषु साम्यं प्रतिपाद्यते । अर्थात् यादृक् वर्णनं रघुवशंमहाकाव्ये वर्तते प्रायस्तादृगेव वर्णनं कुमारसम्भवमहाकाव्येऽपि लभ्यते । एवञ्च तत्र (तयोर्महाकाव्ययोः) किञ्चित् वैषम्यमपि दृश्यते यथा कुमारसम्भवमहाकाव्ये वर्ण्यते, **―असूत सद्यः कुसुमान्यशोकः स्कन्धात्प्रभृत्येव सपल्लवानि ।˜** अत्र अशोकवृक्षः प्रथमं पल्लवानि तदनन्तरं कुसुमान्यजीजनदिति । किन्तु रघुवंशमहाकाव्ये **―कुसुमजन्म ततो नवपल्लवास्तदनु षट्पदकोकिलकूजितम् ।˜** इति वर्णनं प्राप्यते । अत्रोक्तं वसन्तसमये कुसुमजन्म ततो नवपल्लवाः सृज्यन्त इति । तात्त्विकदृष्ट्या नात्र किञ्चिद्वैषम्यं किन्तु वर्णनदृष्ट्या सुक्ष्मभेद एव । इह खलु मल्लिनाथेन लिखितं यत् **केषाञ्चिद्द्रुमाणां पल्लवप्राथम्यात् केषाञ्चित्कुसुमप्राथम्यान्नोक्तक्रमस्य दृष्टविरोधः ।।**

## ➢ सन्दर्भग्रन्थसूची

(१) **रघुवंशम्** — मल्लिनाथकृत–सञ्जीवनी–व्याख्या–समलङ्कृतं तथैव च
—चन्द्रकला˜ हिन्दीव्याख्योपेतम्
व्याख्याकार: डॉ.कृष्णमणि त्रिपाठी
चौखम्बा सुरभारती प्रकाशन, वाराणसी
संस्करण २०१६

(२) **कुमारसम्भवम्** — आदितोऽष्टमसर्गावधि मल्लिनाथकृतयाऽ–ष्टमतोऽन्तावधि सीतारामकृतया च सञ्जीविन्या समेतम्
सान्वय —प्रकाश˜ हिन्दीव्याख्योपेतञ्च
हिन्दी व्याख्याकार : डॉ.कृष्णमणि त्रिपाठी
चौखम्बा विद्याभवन, वाराणसी
पुनर्मुद्रित संस्करण २०१०

(३) **शब्दकल्पद्रुम:** — संस्कृत–प्रस्तुति
निर्माणम् – श्रुति झा
निर्देशनम् – प्रो.मदनमोहन झा